ॐ श्री गणेशाय नमः

लम्बोदरं परमसुन्दरमेकदन्तं रक्ताम्बरं त्रिनयनं परमं पवित्रं ।
उद्यद्दिवाकरकरोज्ज्वलकायकान्तं विघ्नेश्वरं सकलविघ्नहरं नमामि ।।
त्वां देव विघ्नदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति ।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ।। 1 ।।

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता ।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।।
या ब्रहमाच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।। 2 ।।

कस्तुरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं ।
नासाग्रे वरमैक्तिकं करतले वेणुःकरे कंकणम् ।।
सर्वांगे हरिचंन्दनं सुललितं कंण्ठे च मुक्तावलीं ।
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ।। 3 ।।

वंशीविभूषितकरान्नवनीरदाभात् ।
पीताम्बरादरूणबिंबफलाघरोष्ठात् ।।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् ।
कृष्णात् परं किमपि तत्त्वमहं न जाने ।। 4 ।।

ब्रह्मामुंरारिस्त्रिपुरान्तकारि भानुः शशी भुमिसुतो बुधश्च ।
गुरूश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ।। 5 ।।

## कृष्णाष्टकम्

वसुदेवसुतं देवं कंसचाणूरमर्दनं । देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरूम् ।। 1 ।।
अतसीपुष्पसंकाशं हारनूपुरशोभितं । रत्नकंकनकेयूरं .................... ।। 2 ।।
कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननं । विलसत्कुण्डलधरं ................. ।। 3 ।।
मन्दारगन्धसंयुक्तं चारूहासं चतुर्भुजं । बर्हिपिच्छाभचूडांगं ............... ।। 4 ।।
उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभं । यादवानां शिरोरत्नं ............... ।। 5 ।।
रूक्मिणिकेलिसंयुक्तं पीताम्बरसुशोभितं । अवाप्ततुलसीगंन्धं ............... ।। 6 ।।
गोपिकानां कुचद्वन्द्वकुंकुमांकितवक्षसं । श्रीनिकेतं महेष्वासं ............... ।। 7 ।।
श्रीवत्सांकं महोरस्कं वनमालाविराजितं। शंखचक्रधरं देवं ................. ।। 8 ।।

ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्सते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशि-यते ।।
ॐ शान्तिः शान्तिः शान्तिः ।।

राधा भक्तिर्हरिर्ज्ञानं ताभ्यां या च समन्विता ।।
तां श्रीभागवतीं गाथां वन्दे युगलरूपिणीं ।।
ॐ शान्तिः शान्तिः शान्तिः ।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM